"तस्मादङ्गिरवोच्यैतद्यादालभ्य एव च" ।
अवोत्त्य प्रोक्ष्य इति रत्नाकरः ॥ नव्यवर्द्धमानधृतम् ।
"उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम् ।
न्युब्जताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" ॥
इति शुद्धितत्त्वम् ॥

अव्दः, पुं, (अव + दन् ॥ औणादिकोऽयं ।) वत्सरः । मेघः । मुस्ता । इति रायमुकुटः सारसुन्दरी च ॥ (मुस्तार्थे प्रयोगो यथा,—
"किराताब्दामृताविश्वचन्दनोदीच्यवत्सरैः ।
शोषातिसारशमनं विशेषाज्ज्वरनाशनम्" ॥
इति वैद्यकचक्रपाणिसङ्ग्रहः ॥)

अव्यक्तः, पुं, (वि + अन्ज + क्त । ततो नञ्समासः ।) विष्णुः । शिवः । कन्दर्पः । इति मेदिनी । मूर्खः इति हेमचन्द्रः । अस्फुटे त्रि ॥)

अव्यक्तं, क्ली, प्रकृतिः । आत्मा । इति हेमचन्द्रः । महदादि । परमात्मा । इति मेदिनी ॥
("योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
सर्व्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ" ॥
इति मानवे ॥
गणितादौ अज्ञातराश्यादिः । अदृश्यः । साङ्ख्यमते सर्व्वकारणं रूपादिहीनतया चक्षुराद्यगोचरं प्रधानं महदादि ।
"महतः परमव्यक्तमव्यक्तात् पुरुषः परः" ।
इति कठोपनिषद् ॥
वेदान्तमते सूक्ष्मशरीरं स्वापावस्थायां शब्दप्रवृत्तिनिमित्तैर्जातिगुणक्रियासम्बन्धैर्व्वर्ज्जितं निर्व्विकारं निराकारं ब्रह्म । परमात्मा, मायोपाधिकं ब्रह्म, सूक्ष्ममतीन्द्रियं लिङ्गग्राह्यं परब्रह्म । यदुक्तम्,—
"अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम्" ।
रूपादिविहीनत्वेन चक्षुराद्यगोचरो योगाभ्यासावसेयो भावः ।
"शाङ्गं सरः कारणमाप्तवाचो
बुद्धेरिवाव्यक्तमुदाहरन्ति" । इति रघुवंशे ॥
प्रकृतिः । तथा हि,—"यत् सर्व्वस्य जगतो वीजभूतमव्याकृतमनामरूपमतत्वं सर्व्वकार्य्यकारणशक्तिसमाहाररूपं अव्यक्ताव्याकृताकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः । सत्त्वादिरूपेण निरूप्यमाणे व्यक्तिरस्य नास्तीत्यव्यक्तम्" ।
यदुक्तम् । "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" ॥ ०॥ सर्व्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम । तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवोदकानां भावानां" ॥ इति सुश्रुतः ॥
"अनादिः पुरुषो नित्यो विपरीतस्तु हेतुजः ।
सदकारणवन्नित्यं दृष्टं हेतुमदन्यथा ॥
तदेव भावादग्राह्यं नित्यत्वान्न कुतश्चन ।
भावाज्ज्ञेयं तदव्यक्तमचिन्त्यं व्यक्तमन्यथा" ॥ इति ॥
"अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः" ।
इति च ॥
"अतोऽन्यत् पुनरव्यक्तं लिङ्गग्राह्यमतीन्द्रियं" ॥
इति च ॥
"अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः" ॥
इति च चरकः ॥)

अव्यक्तरागः, पुं, (न व्यक्तोऽल्पव्यक्तो रागोऽरुणिमा ।) ईषल्लोहितवर्णः । तत्पर्य्यायः । अरुणः २ । इत्यमरः ॥ ताम्रः ३ गौरः ४ । इति जटाधरः ॥

अव्यङ्गः, त्रि, (न सन्ति व्यङ्गानि यस्य ।) व्यङ्गरहितः । अविकलाङ्गः । यथा,—
"तत आहूय धर्म्मज्ञं ब्राह्मणं वेदपारगं ।
अव्यङ्गावयवं पूज्य गन्धधूपार्च्चनादिभिः" ॥
इति मत्स्यपुराणे ६६ अध्यायः ॥

अव्यङ्गा, स्त्री, (अवेर्मेषस्य अङ्गं शृङ्गमिव अङ्गं यस्याः ।) शूकशिम्बी । इति केचित् ॥ अमरकोषे अव्यण्डा इति तट्टीकायां अव्यण्डा इति च पाठः ॥ व्यङ्गरहिते अविकलाङ्गे च त्रि ॥

अव्यङ्ग्यं, क्ली, (नास्ति व्यङ्गालङ्कारो यस्मिन् ।) व्यङ्ग्यालङ्काररहितकाव्यं ॥ यथा,—
"सव्यङ्ग्यमुत्तमं काव्यमव्यङ्ग्यमधमं स्मृतं ।
किञ्चिद्व्यङ्ग्यसमायुक्तं मध्यमं परिकीर्त्तितं" ॥
इति काव्यचन्द्रिका ॥

अव्यञ्जनः, पुं, (नास्ति व्यञ्जन सुभलक्षणं शृङ्गं, यस्य ।) शृङ्गहीनपशुः । इति हलायुधः ॥ अस्फुटे त्रि ॥ (अनुद्भिन्नरजस्वलाचिह्ना कन्या । यथा,—
"असंप्राप्तरजा गौरी प्राप्ते रजसि रोहिणी ।
अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका" ॥
इति पशुतन्त्रे ॥)

अव्यण्डा, स्त्री, (न विगतमण्डं वीजमस्याः ।) अव्यण्डा इति कुत्रचिदमरकोषे पाठः ॥ आलकुशीति भाषा ।

अव्यथः, त्रि, (नास्ति व्यथा यस्य सः ।) पीड़ारहितः । व्यथाशून्यः । सर्पे पुं । इति मेदिनी ॥

अव्यथा, स्त्री, (न व्यथा । नञ्तत्पुरुषः ।) हरीतकी ॥ पद्मचारिणी । इत्यमरः ॥

अव्यथिः, पुं, अश्वः । सङ्ग्रामे न बिभ्यतीति अव्यथिः । व्यथ भयसञ्चलनयोः सर्व्वधातुभ्य इति इन्प्रत्ययः ततो नञ्समासः । वेदप्रयोगोऽयं ॥

अव्यथिषः, पुं, (न + व्यथ + टिषच् ।) समुद्रः । सूर्य्यः । इति सिद्धान्तकौमुद्या उणादिवृत्तिः ॥

अव्यथिषी, स्त्री, (अव्यथिष + ङीप् ।) पृथिवी । अर्द्धरात्रं । इति सिद्धान्तकौमुदी ॥

अव्यथ्यः, त्रि, (न + व्यथ + क्यप् ।) व्यथाशून्यः । इति पाणिनिः ॥

अव्ययं, क्ली, पुं, (न + वि + इन् + अच् ।) शब्दविशेषः । तत्परे विभक्तिर्न तिष्ठति अतएव लिङ्गत्रयाविकृतं । तथाच कातन्त्रे,—
"सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु ।
वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययम्" ॥
(क्ली, अनाद्यन्तं विकारशून्यं परब्रह्म । यथा,—
"अनणवस्थूलमङ्कस्वमदीर्घमजमव्ययम् ।
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत्" ॥
इति आत्मबोधे ॥)

अव्ययः, पुं, (नास्ति व्ययो यस्य ।) विष्णुः ।
("नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे ।
पुरुषायाप्रमेयाय शाश्वतायाव्ययाय च" ॥
इति मार्कण्डेयपुराणे ॥) व्ययरहिते, त्रि । इति मेदिनी ॥ (अविनाशी । नित्यपुरुषः । यथा,—
"तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः" ॥ इति रघुवंशे ।
"ःसूक्ष्माभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम्" ।
इति मानवे ॥)

अव्यर्थः, त्रि, (न व्यर्थः । नञ्तत्पुरुषः ।) अमोघः । सफलः । यथा,—
"दुर्निवार्य्यञ्च दुर्द्धर्षमव्यर्थं वैरिघातकम् ।
तेजसा चक्रतुल्यञ्च सर्व्वशस्त्रास्त्रघातकम्" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥

अव्यवसायवान्, [त्] त्रि, (अव्यवसाय + मतुप् । मस्य वः ।) व्यवसायरहितः । अव्यवसायी । तत्पर्य्यायः । शिक्कुः २ । इति त्रिकाण्डशेषः । (अनुशीलनरहितः ।)

अव्यवस्था, स्त्री, (वि + अव + स्था + अङ् । ततो नञ्समासः ।) अवसिद्धान्तः । अविधिः । शास्त्रविरुद्धव्यवस्था । इति नञ्समासनिष्पन्ना ॥ (चञ्चले । यथा, कुमारे,
"स्थलारविन्दश्रियमव्यवस्थां" ॥)

अव्यवस्थितः, त्रि, (न व्यवस्थितः । नञ्समासः ।) नीतिशास्त्रादिव्यवस्थानभिज्ञः । सिद्धान्तरहितः । यथा,—
"क्वचिद्रुष्टः क्वचित्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः" ॥
इति हितोपदेशः ॥

अव्यवहार्य्यं, त्रि, (वि + अव + हृ + ण्यत् । ततो नञ्समासः ।) व्यवहारायोग्यं । अव्यवहरणीयं यथा । ज्ञानतश्चाण्डालान्त्यस्त्रीगमने तत्तुल्यतया द्विगुणव्रताचरणे कृतेऽपि न व्यवहार्य्यः । यथा याज्ञवल्क्यः ।
"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतोऽव्यवहार्य्यस्तु वचनादिह जायते" ॥
पापान्तरेऽप्यव्यवहार्य्यत्वं याज्ञवल्क्योक्तम् ।
"शरणागतबालस्त्रीहिंसकान् संवसेन्न तु ।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्" ॥
"अत्र च कामतो महापातकादिहत्यापकर्तुरव्यवहार्य्यत्वदर्शनात् कामतो बहुतरगुणयुक्तशरणागतादिहन्तॄणामव्यवहार्य्यत्वं न तु हीनतरहन्तॄणां अन्यथा विषमशिष्टतापत्तिः स्यात्" ।
इति प्रायश्चित्ततत्त्वम् ॥

अव्यवहितं, त्रि, (वि + अव + धा + क्त । ततो नञ्तत्पुरुषः ।) व्यवधानशून्यं । तत्पर्य्यायः । संसक्तं २ अपटान्तरं ३ अपदान्तरं ४ । इत्यमरः ॥ तट्टीका च ॥ लग्नं ५ । इति शब्दरत्नावली ॥ ("सिसाधयिषाविरहविशिष्टलक्षणाव्यवहितोत्तरलक्षणोत्पत्तिकानुमितिकभिन्नेति" ॥ इति दीधितिः ॥)